# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा-नवम्बर/दिसम्बर-२०१६

| | | |
|---|---|---|
| कक्षा - आचार्य-१, सेमेस्टर-१ | प्रश्नपत्रम् - ४ | गुणा: - ७० |
| विषय: - रामानुजवेदान्त: | कोड - CC-4.1.3 | समय: - ०३-०६ |
| दिनाङ्क: - ८.१२.२०१६ | ग्रन्थ: - छान्दोग्योपनिषद् | |

---

### प्रथमान्विति: ( युनिट - १ )

**प्रश्न: १** **कस्यचिदेकस्य मन्त्रस्य व्याख्यात्मकमुत्तरं विलिख्यताम् ।** ०४

*(१) स एष रसानाꣳ रसतम: परम: । पराध्र्योऽष्टमो यदुद्गीथ: ॥*

*(२) य एवासौ तपति तमुद्गीथमुपासीत । उद्यन्वा एष प्रजाभ्य उद्गायति ।*
*उद्यꣳस्तमोभयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद ॥*

**प्रश्न: २** *१. प्रथमप्रपाठकस्य प्रथमखण्डस्य सारांशं यथाभाष्यं प्रतिपादयत ।* १२

*अथवा*

*२. प्रणवोद्गीथयोरेकत्वविज्ञानोपदेशं यथाभाष्यं प्रतिपाद्य तत्फलं निरूप्यताम् ।*

**प्रश्न: ३** **अधस्तनेषु प्रश्नेषु कयोश्चिद्द्वयो: लघूत्तरं लिखत ।** ०४

*(१) मरणभीता देवा: किं प्रारब्धवन्त: किमर्थञ्च ?*

*(२) 'तस्य यथा कप्यासं पुण्डरीकमेवाक्षिणी' इत्यस्य भावार्थं स्पष्टयत ?*

*(३) देवा: असुरान् जेतुं किं स्वीकृतवन्त: ?*

### द्वितीयान्विति: ( युनिट - २ )

**प्रश्न: ४** **कमप्येकं मन्त्रं यथाभाष्यं प्रतिपादयत ।** ०४

*(१) वागेवर्क्प्राण: साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते वागेव सा प्राणोऽमस्तत् साम ।*

*(२) स एष परोवरीयानुद्गीथ: । स एषोऽनन्त: । परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतमेव विद्वान् परोवरीयान् समुद्गीथमुपास्ते ।*

**प्रश्न: ५** *१. उद्गीथोपासनं यथाभाष्यं निरूपणीयम् ।* ०८

*अथवा*

*२. प्रथमप्रपाठकस्य नवमखण्डस्य सारतत्त्वं यथाभाष्यं व्याख्येयम् ।*

**प्रश्न: ६** **केषाञ्चित् त्रयाणां प्रश्नानामतिलघूत्तराणि प्रदेयानि ।** ०३

*(१) योगिभि: अन्तरक्षिणि किं दृश्यते ?*

*(२) प्रथमप्रपाठकस्य सप्तमे खण्डे कति मन्त्रास्सन्ति ?*

*(३) उद्गीथविज्ञाने के त्रय: कुशला बभूवु: ?*

*(४) नवमखण्डे प्रतिपादिताकाशशब्द: कस्य वाचक: वर्तते ?*

*(५) प्रवाहणो जैबलि: कस्य सुत: आसीत् ?*

## तृतीयान्वितिः ( युनिट - ३ )

**प्रश्नः ७** **कश्चिदेकः मन्त्रो यथाभाष्यं व्याख्येयः ।** ०४

*(१) मटचीहतेषु कुरुष्वाटिक्याटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास ॥*

*(२) पुरोवातो हिंकार मेघो जायते स प्रस्तावो वर्षति ।*
*स उद्गीथो विद्योतते स्तनयति स प्रतिहारः ॥*

**प्रश्नः ८** *१. समस्तस्य साम्न उपासनं तस्य फलञ्च यथाभाष्यं विलिख्यताम् ।* ०८

*अथवा*

*२. द्वितीयप्रपाठकस्य द्वितीयखण्डस्य सारांशं सविशदं निरुप्यताम् ।*

**प्रश्नः ९** **केषाञ्चन त्रयाणां प्रश्नानामतिलघूत्तराणि लिखत ।** ०३

*(१) कस्य सुतः उषस्तिनामा आसीत् ?*

*(२) सर्वाणीमानि भूतानि मानुषलोके उच्चैः कं गायन्ति ?*

*(३) द्वितीयप्रपाठकस्य प्रथमखण्डे कति मन्त्रास्सन्ति ?*

*(४) छान्दोग्योपनिषदः कत्यध्यायाः सन्ति ?*

*(५) रङ्गरामानुजमुनिना का टीका विरचिता ?*

## चतुर्थान्वितिः ( युनिट - ४ )

**प्रश्नः १०** **कस्यचिदेकस्य मन्त्रस्य व्याख्यानं ससन्दर्भं विधेयम् ।** ०४

*(१) न हाप्सु प्रैति । अप्सुमान भवति । य एतदेवं विद्वान् सर्वास्वप्सु पञ्चविधꣳ सामोपास्ते ॥*

*(२) ब्रह्मवादिनो वदन्ति यद्वसूनां प्रातःसवनꣳ रुद्राणां माध्यन्दिनं सवनमादित्यानां च विश्वेषां च देवानां तृतीयसवनम् ॥*

**प्रश्नः ११** *१. प्राणादिदृष्ट्या पञ्चविधसामोपासनं पाठ्यग्रन्थदिशा वर्णयत ।* १२

*अथवा*

*२. ओंकारेण ब्रह्मोपासनविधिं यथाभाष्यं प्रतिपादयत ।*

**प्रश्नः १२** **प्रश्नद्वयं यथाभाष्यं समाधेयम् ।** ०४

*(१) छान्दोग्योपनिषदः परिचयं लिखत ।*

*(२) द्वितीयप्रपाठकस्य कति खण्डाः सन्ति ?*

*(३) यज्ञोऽध्ययनं दानमिति प्रथमः इत्यस्य भावार्थं विशदीकुरुत ?*

=०=